.. sarvama NgalAShTakam ..

# ॥ सर्वमङ्गलाष्टकम् ॥

श्रीगणेशाय नमः ।

लक्ष्मीर्यस्य परिग्रहः कमलभूः सूनुर्गरुत्मान् रथः
पौत्रश्चन्द्रविभूषणः सुरगुरुः शेषश्च शय्यासनः ।
ब्रह्माण्डं वरमन्दिरं सुरगणा यस्य प्रभोः सेवकाः स
त्रैलोक्यकुटुम्बपालनपरः कुर्यात् सदा मङ्गलम् ॥ १॥
ब्रह्मा वायुगिरिशशेषगरुडा देवेन्द्रकामौ गुरुश्चन्द्रार्कौ
वरुणानलौ मनुयमौ वित्तेशविघ्नेश्वरौ ।
नासत्यौ निर्ऋतिर्मरुद्गणयुताः पर्जन्यमित्रादयः सस्त्रीकाः
सुरपुङ्गवाः प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥ २॥
विश्वामित्रपराशरौर्वभृगवोऽगस्त्यः पुलस्त्यः क्रतुः
श्रीमानत्रिमरीचिकौत्सपुलहाः शक्तिर्वसिष्ठोऽङ्गिराः ।
माण्डवयो जमदग्निगौतमभरद्वाजादयस्तापसाः
श्रीमद्विश्णुपदाब्जभक्तिनिरताः कुर्वन्तु वो मङ्गलम् ॥ ३॥
मान्धाता नहुषोऽम्बरीषसगरौ राजा पृथुर्हैहयः श्रीमान्
धर्मसुतो नलो दशरथो रामो ययातिर्यदुः ।
इक्ष्वाकुश्च विभीशणश्च भरतश्चोत्तानपादध्रुवावित्याद्या भुवि
भूभुजः प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥ ४॥
श्रीमेरुर्हिमवाँश्च मन्दरगिरिः कैलासशैलस्तथा माहेन्द्रो
मलयश्च विन्ध्यनिषधौ सिंहस्तथा रैवतः ।
सह्याद्रिर्वरगन्धमादनगिरिर्मैनाकगोमन्तकावित्याद्या भुवि
भूभृतः प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥ ५॥
गङ्गा सिन्धुसरस्वती च यमुना गोदावरी नर्मदा कृष्णा
भीमरथी च फल्गुसरयूः श्रीगण्डकी गोमती ।
कावेरीकपिलाप्रयागविनतावेत्रावतीत्यादयो नद्यः
श्रीहरिपादपङ्कजभवाः प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥ ६॥
वेदाश्चोपनिषद्गणाश्च विविधाः साङ्गा पुराणान्विता वेदान्ता अपि
मन्त्रस्तन्त्रसहितास्तर्कस्मृतीनां गणाः ।
काव्यालङ्कृतिनीतिनातकगणाः शब्दाश्च नानाविधाः
श्रीविष्णोर्गुणराशिकीर्तनकराः प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥ ७॥
आदित्यादिनवग्रहाः शुभकरा मेषादयो राशयो नक्षत्राणि
सयोगकाश्च तिथयस्तद्देवतस्तद्गणाः ।
मासाब्दा ऋतवस्तथैव दिवसाः सन्ध्यास्तथा रात्रयाः सर्वे

स्थावरजङ्गमाः प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥ ८॥
इत्येतद्वरमङ्गलाष्टकमिदं श्रीवादिराजेश्वरैर्व्याख्यातं
जगतामभीष्टफलदं सर्वाशुभध्वंसनम् ।
माङ्गल्यादिशुभक्रियासु सततं सन्ध्यासु वा याः
पठेद्धर्मार्थादिसमस्तवाञ्छितफलं प्राप्नोत्यसौ मानवाः ॥ ९॥
इति श्रीमद्वादिराजविरचितं सर्वमङ्गलाष्टकं संपूर्णम् ।

Encoded and proofread by
Karthik Chandan.P (kardan5380@yahoo.com)
Amith K Nagaraj (amithkn@rediffmail.com)

---

Please send corrections to sanskrit@cheerful.com
Last updated April 5, 2004